संस्कृत-वार्ता:

03.06.2024

सायम् - 06:20

मुख्यवार्ता:

- लोकसभा-निर्वाचनस्य श्व: भविष्यमाणायै मतगणनायै सर्वा: व्यवस्था: सज्जताश्च सम्पूरिता:। आन्ध्रप्रदेश-ओडिसा-विधानसभयो: विधानसभासनानाम् मतगणना श्वो भविष्यति।
- लोकसभा-निर्वाचने चतुष्षष्टि: कोट्यधिकै: मतदातृभि: निज-मताधिकारस्य प्रयोगं कृत्वा कीर्तिमानं संस्थापितम्। एतस्मिन् लोकसभा-निर्वाचने एकत्रिंशत्-महिला-मतदात्र्य: मतदानं कृतवत्य: यत् विश्वस्मिन् सर्वाधिकम् अस्ति।
- प्रधानमन्त्रिणा नरेन्द्रमोदिना समुदीरितं यत् एकविंशतिशताब्द्या: विश्वं बहुभिः आशाभिः सह भारतं प्रति पश्यति।
- मध्यप्रदेशराज्ये ह्य: राजस्थान-राजगढ-सीम्नि कर्षयानस्य परिवृतात् त्रयोदशजना: दिवंगता: जाता: पञ्चदश च व्रणिता:।
- मतगणनानुमानात् प्राक् भारतीय-पीठ-सूचकांक: 'निफ्टी' - सेंसेक्स उभयो: त्रिप्रतिशताधिकं वृद्धि: जाता। एतादृशी वृद्धि: प्रथमवारमेव अवलोक्यते।
- विंशति-प्रतिविंशति: विश्वचषकक्रिकेट प्रतिस्पर्धायां नामीबिया दलेन ओमान दलं पराजित्य प्रतिस्पर्धायां सफलतामेति। अवधेयं यत् सुपरओवर क्रीडा चक्रे प्रथमं क्रीडयत् नामीबिया दलं एकादश अङ्कान् पराजितवत्।

लोकसभा-परिणाम

लोकसभा-निर्वाचनस्य श्व: भविष्यमाणायै मतगणनायै सर्वा: व्यवस्था: सज्जताश्च सम्पूरिता:। आन्ध्रप्रदेश-ओडिसा-विधानसभयो: केषाञ्चित् विधानसभा सनानाम् उप-निर्वाचनस्यापि मतगणना श्वो भविष्यति। मतगणना-प्रक्रिया प्रात अष्टवादने समारप्स्यते। निर्वाचनायोगेन प्रोदीरितं यत् परिणामा: आयोगस्य अन्तर्जालपटले results.eci.gov.in इत्यत्र उतवा मतदातृ-साहाय्य-अनुप्रयोगेऽपि उपलब्धा: भविष्यन्ति।

मतदातृ-कीतिमत्

मुख्य-निर्वाचनायुक्तेन राजीवकुमारेण कथितं यत् लोकसभा-निर्वाचने चतुष्षष्टि: कोट्यधिकै: मतदातृभि: निजमताधिकारस्य प्रयोगं कृत्वा कीर्तिमानं संस्थापितम्। अद्य नवदिल्ल्यां संवाददातृ-सम्मेलने एकस्मिन् श्रीकुमार: अवोचत् यत् सर्वेषां जी-सप्त-देशानां अमेरिका-ब्रिटेन-फ्रांस-जर्मनी-इटली-जापान-कनाडा इत्येतेषां मतदातृणां संख्याया सार्धैकगुणं

अधिकमस्ति। असौ कथितवान् यत् एतस्मिन् लोकसभा-निर्वाचने एकत्रिंशत्-महिला-मतदात्र्य: मतदानं कृतवत्य:।

## जम्मूकश्मीर-त्रिस्तरीय सुरक्षा

जम्मूकश्मीरे लोकसभा-निर्वाचनस्य मतगणनाया: एकदिनात् पूर्व जम्मू-कठुआ-जनपदयो: मतदानकेन्द्राणि परित: त्रिस्तरीया सुरक्षा व्यवस्थिता जाता। आकाशवाण्या: जम्मू-वार्ताहर: सूचनां प्रख्यापितवान् यत् जम्मूजनपदस्य निर्वाचनाधिकारी सचिनकुमारवैश्य: मतगणनास्थलेषु सुरक्षोपयानां आवश्यक-सौविध्यानाञ्च व्यापकीं समीक्षां कृतवान्। प्रशासनेन कर्मचारिण: सम्पूर्णरूपेण प्रशिक्षिता: कृता:। अथ च मतगणनाकेन्द्रेषु निगूढ-परिदर्शि-यन्त्राणि स्थापितानि दृश्याङ्कव्यवस्थापि विहितास्ति। कठुआ-जनपदे उधमपुर-कठुआ-लोकसभा-क्षेत्रायापि त्रिस्तरीय सुरक्षाव्यवस्था सम्पादिता। वरिष्ठारक्षि-अधीक्षक: अनायतअली-चौधरी अवोचत् यत् सुरक्षाया: व्यापक प्रबन्धनं कृतमस्ति। राष्ट्र-विरोधिने तत्वाय सूक्ष्म दृष्टिरपि स्थापिता।

## प्रधानमन्त्री

प्रधानमन्त्रिणा नरेन्द्रमोदिना समुदीरितं यत् विश्वं एकविंशतिशतकस्य बहुभिः आशाभिः भारतं प्रति पश्यति। सः अकथयत् यत् भारतस्य शासनप्रतिरूपं विश्वस्य अनेकेभ्यः देशेभ्यः उदाहरणमस्ति। पत्रमाध्यमेन देशस्य जनै: सह स्वविचारान् प्रस्तुतं कुर्वन् मोदी महोदयः अवदत् यत् अद्यत्वे जनसमर्थकसुशासनं, आदर्शजनपदं, आदर्शखण्डं च इत्यादिविषयेषु वैश्विकस्तरे चर्चां विधीयते। तेनोदीरितं यत् केवलं दशवर्षेषु पंचविंशतिकोटि: निर्धनजनानां सशक्तिकरणं महत्वपूर्णं वर्तते। श्रीमोदी अब्रवीत् यत् भारतप्रशासनं निर्धनानां सशक्तिकरणात् अन्तिमं कार्यं पर्यन्तं स्वकीयमुत्तमं प्रकारेण योगदानं प्रदत्तम् येन विश्वस्मिन् अपि विश्वे भारतं श्रेष्ठतमं स्थानं भजते। असौ चतुर्षु दिक्षु गति:, मापनं , अवसरः, स्तर: इत्येतेषु द्रुतगत्या कार्यान्वयनस्यावश्यकता वरीवर्ति।

## मध्यप्रदेश-दुर्घटना

मध्यप्रदेशराज्ये जनसम्मर्दकाले ह्य: राजस्थान-राजगढ-सीम्नि कर्षयानस्य परिवृतात् त्रयोदशजना: दिवंगता: जाता: पञ्चदश च व्रणिता:। राजगढस्य अधिकारिणा हर्ष-दीक्षितेन वार्ताहरा: संसूचिता: यत् केचन् जना: राजस्थान-राज्यात् मध्यप्रदेश राज्यं प्रति कर्षयानेन एकस्मै विवाहसमारोहाय गच्छन्त: आसन्, मार्गे राजस्थान-राजगढ-सीम्नि कर्षयानं परिवृत्तम्, परिणामत: त्रयोदशजना: मृता: पञ्चदश च व्रणिता: अभवन्। द्वौ जनौ गभीरावस्थायां चिकित्सालये उपचाररतौ स्तौ। मध्यप्रदेशस्य मुख्यमन्त्री डॉ. मोहनयादव:

अवदत् यत् राज्यप्रशासनं राजस्थान-प्रशासनस्य सम्पर्के अस्ति इति। व्रणितानां जनानाम् उपचार: राजगढ़स्य जनपदीय-चिकित्सालये प्रचलति। गभीरावस्थायां निहिता: जना: भोपालं प्रति सम्प्रेषिता:।

<u>सेंसेक्स</u>

भारतीय-पीठ-सूचकांक: 'निफ्टी' सेंसेक्स उभयो: त्रि प्रतिशताधिकं वृद्धि: जाता। एतादृशी वृद्धि: प्रथमवारमेव अवलोक्यते। सेंसेक्स य: त्रयशीति: अधिक पञ्चशतोत्तर षट्सप्तति: सहस्र त: उद्घटितं आसीत् अधुना च वर्धित्वा अष्टत्रिंशतोत्तर सप्तशताधिक षट्सप्तति: सहस्र संजातम्। अयं हि त्रिंशत्-सूचकांकेषु सर्वकालिक: उच्चस्तर: वर्तते। अवधेयं च अंते सेंसेक्स इत्यनेन सप्ताधिक पंचशतोत्तर द्वि सहस्र अंक उतवा त्रि दशमलव त्रीणि5नव प्रतिशतं वृद्धि: अजायत। इत्यमेव निफ्टी पञ्चाशत् य: सप्तत्रिंशत् अधिक त्रिशतोत्तर त्रयोविंशति: सहस्र अङ्कात् साम्प्रतं हि नवत्रिंशत् अधिक त्रिशतोत्तर त्रयोविंशति: सहस्र भूत्वा सर्वकालिक: उच्चस्तर: जात:।

<u>ऋतु-विज्ञान-विभाग:</u>

ऋतु-विज्ञान-विभागेन अग्रिमे दिनद्वये पश्चिमोत्तर-मध्य-पूर्वीय भारते भीषणातपे अपचिति: भविष्यति इति सम्भाव्यते। ऋतु-विभागस्य वरिष्ठ-वैज्ञानिक: आर.के.जेनामणि: प्रोक्तवान् यत् एतेषु क्षेत्रेषु जनेभ्य: भीषण-ताप-प्रकोपात् सुखं मेलिष्यति। विभागेन आगामिषु सप्तदिवसेषु विद्युद्ध्वनिना तीव्रवायुनाच सह पश्चिमबंगाले पूर्वोत्तरभारते च मध्यवृष्टे: अनुमान: अभिव्यक्त:। अपि च दक्षिणभारते केरल-लक्षद्वीप-अण्डमान निकोबार-द्वीप-कर्णाटकेषु एतादृशी स्थिति: भविष्यति।

<u>जम्मू-कश्मीर – उपराज्यपालसंवाद:</u>

जम्मूकश्मीरराज्ये उपराज्यपालेन मनोजसिन्हा इत्यनेन राजभवने वाराणसी-कानपुर-कोलकाता-बेंगलुरू-प्रयागराज-स्थलानि समेत्य देशस्य विभिन्न-क्षेत्राणां व्यापारोद्योग-जगतो: नेतृभि: सह संवाद: विहित:। अत्रावसरे उपराज्यपालेन जम्मूकश्मीरस्य परिवर्तनकारिणी यात्रा विनिमयीकृता। तेनोक्तं यत् विगतेषु केषुचित् वर्षेषु जम्मूकश्मीरे य: अद्वितीयो विकासो जात: तत्सर्वमपि जम्मू-कश्मीरे शान्तिं-समृद्धिं च आनेतुं अपि च कर्तव्ययुत शासनस्य स्थापनस्य अस्माकं संकल्पस्य प्रमाणे वर्तते। अग्रे असौ निगदितवान् यत् राज्यस्य अर्थव्यवस्था इतोऽपि अग्रे प्रवर्धते अपि च निवेशकेभ्य: समुचितावसरान् प्रददाति।

## भारतीय-राष्ट्रिय-राजमार्ग प्राधिकरणम्

भारतीय-राष्ट्रिय-राजमार्ग-प्राधिकरणेन आराष्ट्रे सीमामार्गशुल्के पञ्चप्रतिशतं यावत् वृद्धि कृता। प्राधिकरणस्य एकेन अधिकारिणा संसूचितं यत् नवं उपयोगकर्तृ-शुल्कम् अद्यत: क्रियान्वितं भविष्यति।

## क्रिकेट

विंशति-प्रतिविंशति: विश्वचषकक्रिकेट प्रतिस्पर्धायां नामीबिया दलेन ओमान दलं पराजित्य प्रतिस्पर्धायां सफलतामेति। अवधेयं यत् सुपरओवर क्रीडा चक्रे प्रथमं क्रीडयत् नामीबिया दलं एकादश अङ्कान् पराजितवत्।

।। इति वार्ता: ।।